अभ्यस्तानामादिः । (१८९/३६७३)

अभ्यस्तानामजादावनिटि लसार्वधातुके [1]परतः आदिरुदात्तो भवति । ददति । ददतु । दधति । दधतु । जक्षति । जक्षतु । जाग्रति । जाग्रतु । अचि इत्येव, दद्यात् । अनिटि इत्येव, जक्षितः । आदिः इति वर्तमाने पुनरादिग्रहणं नित्यार्थम् ॥

अनुदात्ते च । (१९०/३६७४)

अविद्यमानोदात्ते च लसार्वधातुके परतोऽभ्यस्तानामादिरुदात्तो भवति । अनजाद्यर्थ आरम्भः । ददाति । जहाति । दधाति । जिहीते । 'मिमीते' (तै. सं. ६.१.९.६) । अनुदात्ते इति[2] [3]बहुव्रीहिनिर्देशो लोपयणादेशार्थः (म. भा. ३.११३) । मा हि स्म दधात् । दधात्यत्र ॥

सर्वस्य सुपि । (१९१/३६८७)

सर्वशब्दस्य सुपि परतः आद्युदात्तो भवति । सर्वः, सर्वौ, सर्वे । सुपि इति किम् ? सर्वतरः । सर्वतमः । प्रत्ययलक्षणेऽप्ययं स्वर इष्यते सर्वस्तोमः (तै. सं. ५.४.१२.३) इति ।

[७०४] सर्वस्वरो[4]ऽनकच्कस्येति वक्तव्यम् । (म. भा. ३.११४)

सर्वकः । चित्स्वरेणान्तोदात्तो भवति ॥

भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति । (१९२/३६७८)

भी ह्री भृ हु मद जन धन दरिद्रा जागृ इत्येतेषां अभ्यस्तानां लसार्वधातुके पिति[5] प्रत्ययात् पूर्वमुदात्तं भवति । बिभेति । जिह्रेति । 'बिभर्ति' (तै. आ. ३.११.४) । 'जुहोति' (तै. ब्रा. २.१.८.३) । 'ममत्तु नः परिज्मा' (तै. सं. २.१.११.१) । मदेः बहुलं छन्दसि इति विकरणस्य श्लुः । 'जजनदिन्द्रम्' (तै. आ. ३.२.१) । 'जन जनने' (धा. पा. ११०६) इत्यस्य पञ्चमे लकारे रूपम् । 'धन धान्ये' (धा. पा. ११०५) इत्यस्य पञ्चमे लकारे दधनत् (तै. ब्रा. २.८.३.५) । दरिद्राति । जागर्ति । भ्यादीनाम् इति किम् ? ददाति । पिति इति किम् ? दरिद्रति ॥

लिति । (१९३/३६७३)

[6]लिति प्रत्ययात् पूर्वमुदात्तं भवति । [7]चिकीर्षकः । जिहीर्षकः । भौरिकिविधम् । भौलिकिविधम् । ऐषुकारिभक्तम् ॥

---

1. परतः नास्ति क. 2. किम् इत्यधिकम् क. 3. बहुव्रीहि नास्ति फ. 4. अनच्कस्य ह, अनकस्य क. 5. परतः इत्यधिकम् ग. ह. 6. लकारेत् क. फ. 7. चिकीर्षकः नास्ति ह.